दुर्गह्व्यापनः” भा० अनु० व्याप्तौ वा० वन शक० ।

**दुर्गोत्सव** पु० ६त० । दुर्गाया देवीभेदस्य पूजानिमित्ते उत्सवे स च शारदिकः वासन्तिकश्च ।

**दुर्ग्रह** त्रि० दुःखेन गृह्यतेऽसौ दुर्+ग्रह—कर्मणि खल् । १दुःखेन ग्राह्ये २दुर्ज्ञेये ३दुरासदे “दुर्गाणि दुर्ग्रहाण्यासन् तस्य रोद्धुरपि द्विषाम्” रघुः । ४अपामार्गे स्त्री शब्दार्थचि० ।

**दुर्ग्राह्य** त्रि० दुर्+ग्रह—कर्मणि ण्यत् । ग्रहीतुमशक्ये दुःखेन ग्राह्ये “जग्राह तद्धनूरत्नं दुर्ग्राह्यं दैवतैरपि” हरिवं० ८४अ० ।

**दुर्घट** त्रि० दुर्+घट—कर्मणि खल् । घटयितुमशक्ये दुःसंपाद्ये । “कोऽन्वर्थो दुर्घट इव भवति स्वरूपद्वयाभावात्” भाग० ६।८।३४

**दुर्घोष** पु० स्त्री० दुष्टो घोषोऽस्य । १भल्लूके राजनि० स्त्रियां जातित्वात् ङीष् । २दुष्टशब्दयुक्ते त्रि० स्त्रियां टाप् । प्रा०स० । ३दुष्टे शब्दे पु०

**दुर्जन** पु० दुष्टो जनः प्रा०स० । खलपुरुषे “दुर्जनः परिहर्त्तव्यो विद्यया भूषितोऽपि सः । मणिना भूषितः सर्पः किमसौ न भयङ्करः” चाण० “शाम्येत् प्रत्यपकारेण नोपकारेण दुर्जनः” कुमा० “पानं दुर्जनसंसर्गः पत्या च विरहोऽटनम्” मनुः श्या० च्व्यर्थे क्यङ् । दुर्जनायते अदुर्जनो दुर्जनो भवतीत्यर्थः ।

**दुर्जय** त्रि० दुःखेन जीयतेऽसौ दुर्+जि—कर्मणि खल् । १जेतुमशक्ये दुःखेन जेतव्ये । २परमेश्वरे पु० “समावर्त्तो निवृत्तात्मा दुर्जयो दुरतिक्रमः” विष्णुसं० । “क्रोशांश्च विविधांस्तांस्तान् स्थत्युमेव च दुर्जयम्” मनुः ३कार्त्तवीर्यवंश्ये ऽनन्तनृपपुत्रे नृपभेदे कूर्मपु०

**दुर्जयन्त** पु० नृपभेदे । विष्णुपु०

**दुर्जर** त्रि० दुःखेन जीर्यति जॄ—अच् । दुःखेन जीर्यति “ग्राहिणी वातला रूक्षा दुर्जरा तक्रकूर्चिका” सुश्रु० “कफप्रकोपि तन्मद्यं दुर्जरञ्च विशेषतः” सुश्रु० । २ज्योतिष्मतीलतायाम् स्त्री राजनि०

**दुर्जात** न० दुष्टं जातम् प्रा०स० । व्यसने “दुर्जातबन्धुरयमृक्षहरीश्वरो मे” रघुः । २असम्यग्जाते त्रि० मेदि० ३असमञ्जसे त्रि० त्रिका० । “यो न यातयते वैरमल्पसत्त्वोद्यमः पुमान् । अफलं जन्म तस्याहं मन्ये दुर्जातजायिनः” भा०व० ३५ अ० “दुष्कुलेयस्तथा मूढो दुर्जातः शक्र ! दृश्यते” भा०शा० ८।२०श्लो०

**दुर्जाति** त्रि० दुःस्थिता जातिरस्य प्रा०ब० । निन्दितवंश्ये “दुर्जातेः सूतपुत्रस्य शकुनेः । सौबलस्य च” भा०उ० ४८ अ० । दुःस्थिता जातिर्जन्म यस्य प्रा०ब० । २निन्दितजनिके त्रि० “रुदितशरणा दुर्जातीनां भवन्त्यफलाः क्रियाः” अनर्घ० ... “बलवसौम भवन्ति धृष्टा दुर्जातिरूपा फलम्” अमरुश० दुष्टा जातिः प्रा०स० । ३दुष्टायां जातौ तत्र भवः छ । दुर्जातीय दुष्टजातिमत्ते । “दुर्जातयेन येन त्वमीदृशोजनितः सुतः” हरिवं० ८०अ०

**दुर्जीव** त्रि० दुःस्थितो जीवो जीवनोपायो यस्य प्रा०ब० । १परभक्ताद्युपजीविनि । “यथा च मन्ये दुर्जीवमेवं न सुकरं ध्रुवम्” रामा० २५६अ० । दुर्+जीव—भावे खल् । २निन्दितजीवने न० “सुजीवं नित्यशस्तस्य यः परैरूपजीव्यते । राम ! तस्य तु दुर्जीवं यः परानुपजीवति” रामा० २।१०५।५ दुःखं जीवति दुर्+जीव—अच् । ३परायत्ततया जीविनि त्रि० “सर्वं परवशं दुःखमिति” मनूक्तेः जीवनस्य पराधीनत्वे दुःखहेतुत्वात् तज्जीवनस्य तथात्वदुक्तः ।

**दुर्ज्ञेय** त्रि० दुःखेन ज्ञायते ज्ञा+कर्मणि यत् । ज्ञातुमशक्ये दुःखेन ज्ञेये “उच्चावचेषु भूतेषु दुर्ज्ञेयामकृतात्मभिः” मनुः ।

**दुर्ण(र्न)य** पु० दुष्टो नयः प्रा०स० णत्वम् । १दुष्टायां नीतौ दुःस्थितो नयोऽस्य प्रा०ब० । २तद्युते त्रि० । “चलत्योमम हृदयस्य दुर्णयस्य फलोदयः” हरिवं० ५१०अ० अत्राणत्वमेव न्याय्यम् पूर्वपदात् संज्ञायामेव णत्वविधानात् दुर्+नी—अचि तु अणत्वमेव णत्वविधौ दुरः प्रतिषेधात् ।

**दुर्णश** त्रि० दुःखेन नश्यति दुर्+नश—अच् वेदे णत्वम् । कृच्छ्रेण नष्टे “परएकेन दुर्णशं चिदर्वाक्” अथ० ५।११।७ लोके तु दुर्नश इत्येवाणत्वयुक्तः ।

**दु(र्णा)र्नामन्** स्त्री दुःस्थितं नामास्य पूर्वपदात् संज्ञायां णत्वे प्राप्ते क्षुभ्नादेराकृतिगणत्वात् न णत्वमित्यके वेदे तु णत्वमध्यपाठो दृश्यते । दीर्घकोषिकायां (झिनुक) ख्याते १पदार्थे अमरः २अर्शोरोगे च राजनि० तद्रोगस्यानिपातकशेषत्वात्कीर्त्तनीयत्वेन निन्दितत्वात् तथात्वम् “अमी वा यस्ते गर्भं दुर्णामा योनिमाशये” ऋ० १०।१६२।१। “कृणोत्यस्मै भेषजं बलं दुर्णामचातनम्” । “दुर्णामा च सुनामा चोभा संवृतमिच्छतः” अथ० ८।६।३। वा डाप् दुर्नामा उपधालोपित्वात् पक्षे ङीप् उपधालोपे दुर्नाम्नी

**दुर्दम** त्रि० दुःखेन दम्यतेऽसौ दुर्+दम—कर्मणि खल् । दमयितुमशक्ये “सक्तपाशावकीर्णास्ते न भविष्यन्ति दुर्दमाः” भा०शा० ८८अ० । २रोहिणीगर्भजाते वसुदेवात्मजभेदे